## अम्नरूधरवरित्युभयथा छन्दसि। (७०/३६०४)

अम्नस् ऊधस् अवस् इत्येतेषां छन्दसि विषये उभयथा भवति, रुर्वा रेफो वा। अम्नस् – 'अम्न एव' (मै. १. ६. १०), अम्नरेव। ऊधस् – '[2]ऊध एव' (काठ. ७. ५. २०), ऊधर् (ऋ. १०. १००. ११) एव। अवस् - अवः (अ. वे. २०. २५. २) एव, अवरेव। यदा रुत्वं तदा 'भोभगोऽघोऽपूर्वस्य योऽशि' (८.३.१७/१६७) इति यकारः।

[९२५] छन्दसि भाषायां च विभाषा प्रचेतसो राजन्युपसङ्ख्यानं कर्तव्यम्। (म. भा. ३. ४१२)

'प्रचेता राजन्' (ऋ. १. २४. १४), 'प्रचेतो राजन्' (तै. १. ५. ११. ३)।

[९२६] अहरादीनां पत्यादिषूपसङ्ख्यानं कर्तव्यम्। (म. भा. ३.४१२)

[3]अहर्पतिः, अहःपतिः। गीर्पतिः, गीःपतिः। धूर्पतिः, धूःपतिः। विसर्जनीयबाधनार्थमत्र पक्षे रेफस्यैव रेफो विधीयते॥

## भुवश्च महाव्याहृतेः। (७१/३६०५)

भुवस् इत्येतस्य महाव्याहृतेः छन्दसि विषये उभयथा भवति, रुर्वा रेफो वा। भुव इत्यन्तरिक्षम्, भुवरित्यन्तरिक्षम्। [4]महाव्याहृतेः इति किम्? '[5]भुवो विश्वेषु सवनेषु यज्ञियः' (ऋ. १०. ५०. ४)[6]। भुवः इत्येतदव्ययमन्तरिक्षवाचि महाव्याहृतिः॥

## वसुस्रंसुध्वंस्वनडुहां दः। (७२/३३४)

'ससजुषो रुः' (८.२.६६/१६२) [7]इत्यतः सः इति वर्तते, तेन सम्भवात् व्यभिचाराच्च वसुरेव विशेष्यते, न स्रंसुध्वंसू[8], व्यभिचाराभावात्, असम्भवाच्च न अनडुह् शब्दः। वस्वन्तस्य पदस्य, सकारान्तस्य स्रंसु, ध्वंसु, अनडुह इत्येतेषां च दकारादेशो भवति। वसु – विद्वद्भ्याम्। विद्वद्भिः। पपिवद्भ्याम्। पपिवद्भिः। स्रंसु – [9]उखास्रद्भ्याम्। उखास्रद्भिः। ध्वंसु – [10]पर्णध्वद्भ्याम्। पर्णध्वद्भिः। अनडुह् – अनडुद्भ्याम्। अनडुद्भिः। सः इत्येव, विद्वान्। पपिवान्। नकारस्य न भवति। रुत्वे नाप्राप्ते इदमारभ्यते इति तद् बाध्यते। संयोगान्तलोपस्तु नैवम् इति तेन एतदेव दत्वं बाध्यते। अनडुहोऽपि ढत्वमनेन बाध्यते। नुमस्तु विधानसामर्थ्यान्न भवति, अनड्वान्, हे अनड्वन् इति। [11]पदस्य इत्येव, विद्वांसौ। विद्वांसः॥

## तिप्यनस्तेः। (७३/२४८४)

तिपि परतः सकारान्तस्य पदस्य अनस्तेः दकार आदेशो भवति। अचकाद् भवान्। अन्वशाद् भवान्। तिपि इति किम्? चकास्तेः क्विप्, चकाः। अनस्तेः इति किम्? [12]आप एवेदं सलिलं [13]सर्वमाः। आः इत्यस्तेः लङि तिपि 'बहुलं छन्दसि' (७. ३. ९७/३५८६) इति ईड् न कृतः॥

---

1. अम्नयेव ह. 2. ऊधयेव ह. 3. अहर्पतये मा. सं. 9.20. 4. महाव्याहृतिः ब. 5. भुवनेषु मुद्रितः पाठः 6. भुवो मध्यं भुव इदम् इत्यधिकम् ब. इ. ड. 7. इति नास्ति क. ब. 8. इत्येतयोः इत्यधिकम् इ. 9. उखास्रत् ड. 10. पर्णध्वत् ड. 11. वाक्यमिदं नास्ति क. ह. 12. अप्रकेतं सलिलं सर्वमा इदम् ऋ. 10. 129. 3. 13. सर्वमासीत् इ.